श्री तारांबा हृदयं

श्री तारांबा हृदयं

श्री शिव उवाच |
शृणु पार्वति भद्रं ते लोकानां हितकारकं |
कथ्यते सर्वदा गोप्यं ताराहृदयमुत्तमं || 1 ||

श्री पार्वत्युवाच |
स्तोत्रं कथं समुत्पन्नं कृतं केन पुरा प्रभो |
कथ्यतां सर्ववृत्तांतं कृपां कृत्वा ममोपरि || 2 ||

श्री शिव उवाच |
रणेदेवासुरे पूर्वं कृतमिंद्रेण सुप्रिये |
दुष्टशत्रुविनाशार्थं बल वृद्धि यशस्करं || 3 ||

ॐ अस्य श्रीमदुग्रतारा हृदय स्तोत्र मंत्रस्य – श्री भैरव ऋषिः – अनुष्टुप्छंदः – श्रीमदुग्रतारादेवता – स्त्रीं बीजं – हूंशक्तिः – नमः कीलकं – सकलशत्रुविनाशार्थे जपे विनियोगः |

करन्यासः –
ॐ स्त्रीं अंगुष्ठाभ्यां नमः |
ॐ ह्रीं तर्जनीभ्यां नमः |
ॐ हूं मध्यमाभ्यां नमः |
ॐ त्रीं अनामिकाभ्यां नमः |
ॐ ऐं कनिष्ठकाभ्यां नमः |
ॐ हंसः करतलकरपृष्ठाभ्यां नमः |

अंगन्यासः –
ॐ स्त्रीं हृदयाय नमः |
ॐ ह्रीं शिरसे स्वाहा |
ॐ हूं शिखायै वषट् |
ॐ त्रीं कवचाय हुं |
ॐ ऐं नेत्रत्रयाय वौषट् |
ॐ हंसः अस्त्रायफट् |

ध्यानं |

ध्यायेत्कोटिदिवाकरद्युतिनिभां बालेंदुयुक्छेखरां
रक्तांगीं विकटां सुरक्तवसनां पूर्णेंदुबिंबाननां |
पाशंखड्गमहांकुशादि दधतीं दोर्भिश्चतुर्भिर्युतां
नानाभूषणभूषितां भगवतीं तारां जगत्तारिणीं || 4 ||

एवं ध्यात्वा शुभां तारां ततस्तु हृदयं पठेत् |
तारिणी तत्त्वनिष्ठानां सर्वतत्त्वप्रकाशिका || 5 ||

रामाभिन्नापदाशक्तिश्शत्रुनाशं करोतु मे |
सर्वदाशत्रुसंरंभे तारा मे कुरुतां जयं || 6 ||

स्त्रीं त्रीं स्वरूपिणी देवी त्रिषु लोकेषु विश्रुता |
तव स्नेहान्मयाख्यातं न पशूनां प्रकाशयेत् || 7 ||

शृणु देवि तवस्नेहात्तारानामानि तत्वतः |
वर्णयिष्यामि गुप्तानि दुर्लभानि जगत्त्रये || 8 ||

तारिणी तरळा तारा त्रिरूपा तरणीप्रभा |
तत्त्वरूपा महासाध्वी सर्वसज्जनपालिका || 9 ||

रमणीया रजोरूपा जगत्सृष्टिकरी परा |
तमोरूपा महामाया घोरारावा भयानका || 10 ||

कालरूपा काळिकाख्या जगद्विध्वंसकारिणी |
तत्त्वज्ञाना परानंता तत्त्वज्ञानप्रदाऽनघा || 11 ||

रक्तांगी रक्तवस्त्रा च रक्तमालासुशोभिता |
सिद्धिलक्ष्मीश्च ब्रह्माणि महाकाळी महालया || 12 ||

नामान्येतानि ये मर्त्यास्सर्वदैकाग्रमानसाः |
प्रपठंति प्रिये तेषां किंकरत्वं करोम्यहं || 13 ||

तारां तारपरांदेवीं तारकेश्वरपूजितां |
तारिणीं भवपाथोधेरुग्रतारां भजाम्यहं || 14 ||

स्त्रीं ह्रीं हूं त्रीं फण्मंत्रेण जलं जप्त्वाऽभिषेचयेत् |
सर्वरोगाः प्रणश्यंति सत्यं सत्यं वदाम्यहं || 15 ||

त्रीं स्वाहांतैर्महामंत्रैश्चंदनं साधयेत्ततः |
तिलकं कुरुते प्राज्ञो लोकोवश्योभवेत्प्रिये || 16 ||

स्त्रीं ह्रीं त्रीं स्वाहा मंत्रेण श्मशानं भस्म मंत्रयेत् |
शत्रोर्गृहेप्रतिक्षिप्ते शत्रोर्मृत्युर्भविष्यति || 17 ||

ह्रीं हूं स्त्रीं फडंतमंत्रैः पुष्पं संशोध्यसप्तधा |
उच्चाटनं करोत्याशु रिपूणां नैव संशयः || 18 ||

स्त्रीं त्रीं ह्रीं मंत्रवर्येण अक्षताश्चाभि मंत्रिताः |
तत्प्रतिक्षेपमात्रेण शीघ्रमायाति मानिनी || 19 ||

हंसः ॐ ह्रीं स्त्रीं हूं हंसः |

इति मंत्रेण जप्तेन शोधितं कज्जलं प्रिये |
तस्यैव तिलकं कृत्वा जगन्मोहं स वशं नयेत् || 20 ||

ताराया हृदयं देवि सर्वपापप्रणाशनं |
राजपेयादि यज्ञानां कोटि कोटि गुणोत्तरं || 21 ||

गंगादि सर्वतीर्थानां फलं कोटिगुणं स्मृतं |
महादुःखे महारोगे संकटे प्राणसंशये || 22 ||

महाभये महाघोरे पठेत् स्तोत्रं महोत्तमं |
सत्यं सत्यं मयोक्तंते पार्वति प्राणवल्लभे || 23 ||

गोपनीयं प्रयत्नेन न प्रकाश्यमिदं क्वचित् || 24 ||

इति श्री भैरवीतंत्रे शिवपार्वती संवादे श्रीमदुग्रताराहृदयं |